BHARATI INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY

RESEARCH & DEVELOPMENT (BIJMRD)

(Open Access Peer-Reviewed International Journal)

DOI Link : https://doi.org/10.70798/Bijmrd/03070032

**Available Online: www.bijmrd.com|BIJMRD Volume: 3| Issue: 07| July 2025| e-ISSN: 2584-1890**

# Bhisma: The Story of Tragedy in Bravery

**Sutrisha Chakraborty Nanda**

State Aided College Teacher, Department of Sanskrit, V.S. Mahavidyalaya, Manikpara

**अमूर्तम् (Abstract):**

*महाभारतं पृथिव्याः एकं बृहत्तममहाकाबम्। महाकाव्यमिदं न कस्य विशेषसम्प्रदाय़स्य धर्मग्रन्थरूपे न केवलं खातमपि तु इतिहासपुराणराजनीतिधर्मनीतिशास्त्राणाम् आकरग्रन्थस्वरुपेखातएकं महाकाव्यम्। इदं महाकाव्यम् सनातनधर्मस्य एकोत्कृष्टं महाकाव्यग्रन्थम्। अयं ग्रन्थः मानवाणां चिन्तायाः एकपूर्णप्रकाशः। महाकाव्यमिदं पञ्चमवेदः इति कथ्यते। महाभारतं महाकाव्यमध्ययेण मानवाणां समाजव्यक्तिवर्गाणां महाभारतं प्रति श्रद्धा जायते। वेदव्यासकृतमहाभारते चत्वारवेदस्य वर्णना उपलभ्यते, अपि च अस्मिन् महाकाव्ये उपनिषदः सारः प्राचीनइतिहासपुराणाणां वर्णना लिपिवद्धमस्ति। महाभारतम् एकमहाकाव्यं तथा धर्मग्रन्थम्। महाकाव्यमिदं ज्ञानविज्ञानस्य राजनीति-अधात्मशास्त्त्रस्य एकसंग्रहं मेलवन्धनम्। महाभारतस्य अतिव्याप्यकथा यथा आकर्षनीयं तथैव अकर्षनीयमस्य महाकाव्यस्य वहुवर्णितानि विचित्राणि चरित्राणि। युधिष्ठिरः अर्जुनः कर्णः भीमः दुर्योधनः शकुनिः च। एतानि चरित्रानि स्वगुणेन गुणान्वितानि। एषां चरित्राणां मध्ये अपरमनेकं चरित्रानि सन्ति येषां मननेन अनुधावनेन महाभारतमध्ययनं सानन्दपूर्णं भवति इति। एषां चरित्राणां मध्ये महामतिभीष्मचरित्रमन्यतममनवद्यम्। महर्षिवेदव्यास अस्मिन् महाग्रन्थे सम्पूर्ण धर्मशास्त्रस्य स्वत्वं लिखितवान्। महाभारतम् इतिहासज्ञानस्य भाण्डारस्वरुपम्। पुराकालस्य इतिहासं ज्ञानार्थं वयं महाभारतस्य स्मरणापन्नं भवामः। अतः महाभारतम् ऐतिहासिकधार्मिकराजनैतिकविषयसमन्वितम् ग्रन्थमेकम् गौरवपूर्णम्। महाभारते उल्लिखितं भीष्मपर्वन् अतीवमहत्वपूर्णं रूपे ख्यातम्। भीष्मपर्वणि अन्तर्गतं श्रीमद्भगवद्गीतायाः उद्देश्यं वर्णिता आसीत्। भगवान् श्रीकृष्णस्य अर्जुनं प्रति मुखनिसृतवाणी हि श्रीमद्भगवद्गीतारूपे समादृता। युद्धक्षेत्रे अर्जुनः परिजनं पश्य कदापि युद्धं न चिकीर्षति तु श्रीकृष्णस्य मुखनिसृतवाणीं श्रुत्वा सः युद्धं चकार इति। महभारते वर्णितइतिहासं महर्षिवेदव्यासेन स्वयं दृष्टम्।*

*महाकावमिदं अष्टादशपर्व्वाणि सम्मनित्वानि। अस्मिन् महाकाव्ये आनुमानिकएकशतसहस्रश्लोकाः सन्ति। इदाणीं क्षणे अस्य महाकाव्यस्य एकस्य महतः चरित्रदेवव्रतस्य (भीष्म) कथा विवदिषामि। महाभारते भीष्मः वृद्धः वयसि उपनीतः आसीत् तथापि युवावत् दृश्यते। सः तस्य पितुः विवाहं दापयति। पुत्रप्रतिमस्य विचित्रवीर्यस्य विवाहार्थं काशीराजस्य तिस्रकन्याः जहार। सुप्रसिद्धभरतवंशस्य सत्यवत्याः पुत्रयोः उत्तराधिकारार्थं स्वस्य उत्तराधिकारं सः न स्वीकृतवान्। सः केवलं पितामहभूत्वा स्वस्य जीवनं व्याप्यं केवलम् अपश्यत् केवलं असेवत परन्तु संसारजीवनात् मुक्तिं नीत्वा न अगच्छत्। इदृशः निर्मोहभीष्मचरित्रः साधुसन्यासिव्यक्तिवर्गानामपि दुर्लभः। द्रोणाचार्यः ब्राह्मणः ततस्वत्तेपि क्षत्रियस्य अस्त्रवृत्ति जग्राह। स हस्तिनापुरराजगृहे आचार्यस्य पदमलंकृतवान्। द्रोनाचार्यवत् कृपाचार्यवत् महामतिभीष्मः अपि एकः विषादजनक एकचरित्रः।*

**मुख्यपदम् (Keywords):** *दक्षराजकन्यावसोः कामधेनुलुम्विनीं, विषादजनकः नायकः, वशिष्टमुनेः, अष्टावसुभ्रातरः।*

**मुखवन्धः (Introduction):**

भारतवंशीयाणां महायुद्धस्य महाभारत्वस्य कथायाः काव्यरूप भवति महाभारतमिति महाकाव्यमस्य ग्रन्थस्य नामकरणस्य प्रसङ्गे अस्मिन् महाकाव्ये उच्यते- **"महत्त्वाद् भारवत्वाच्च महाभारतमुच्यते"** महाकाव्यमिदम् अष्टादशपर्वाणि सम्मन्नितान अस्मिन् महाकाव्ये आनुमानिकएकशतसहस्रश्लोकाः सन्ति। अस्य महाकाव्यस्य रचयिता महर्षिवेदव्यासः भारतवर्षस्य सर्वतत्वंसर्वतथ्यं भारतसंहितायाः अन्तभूक्तमस्ति। महाभारतम् अर्णवसदृशमिव रत्नस्याकरम् सुष्टूक्तम् –

यथा समुद्रो भगवान् यथा मेरुर्महागिरि।

उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते।। (आदिपर्व श्लोक, 62)

महाभारतस्य रचयिता पराशरमुनेः पुत्रः तस्य माता सत्यवती। यमुनायाः द्वीपे तस्य जन्ममभवत्। सः हि वेदस्य विभागकर्ता अतः तस्य नाम वेदव्यासः अभवत्। वशिष्टमुनेः कामधेनुलुम्विनीं जहुः अष्टावसुभातरः, अष्टावसुभातरः आसन् दक्षराजकन्या वसोः गर्भजाताः धर्मस्य अष्टपुत्राः। लुम्बिनीं हृतवन्तः अष्टावसवः इदं ज्ञात्वा वषिष्टमुनिः क्रुदध्य सन् तान् अभिशापं प्रदत्तवान् यत्-ते मर्त्ते मनुष्यरूपे जन्मग्रहनं करिष्यति इति। निरुपायं भूत्वा अष्टावसवः मातुः गङ्गाग्याः स्मरनापन्नमभवन्। तदा माता गङ्गा तान् अवदत् मर्त्ते ते वसवः मातुः गङ्गायाः पुत्ररुपेण हि जनिष्यन्ते, अतः माता गङ्गा जातमात्रं हि तान् सर्वान् पुत्रान् गङ्गासलिले अर्पणं करिष्यति च मुक्तिं दास्यति इति।

एकदा महाराज्ञःप्रतिपस्य पुत्रः शान्तनुः गङ्गापुलिने विहारकाले ददर्श माता गङ्गाम्। दर्शनमात्रेण सः तां विवाहं चिकीर्षति स्म। मातागङ्गा तस्य प्रस्तावं श्रुत्वा शान्तनुं प्रति शर्तद्वयमवदत्।

प्रथम-शर्तम्-शान्तनुः मातागङ्गायाः परिचयं कदापि न ज्ञातुं एषिष्यति, द्वितीयशर्तम्- मातागङ्गयाः कस्य अपि कार्यस्य कारणं शान्तनुः मातागङ्गां कदापि न प्रक्ष्यति इति। सर्वं श्रुत्वा नृपः शान्तनुः शर्तद्वयं प्रति सम्मतिं ददौ। अतः माता गङ्गायाः च शान्तनोः परिणयं च अभवत्। तदनन्तरं एकमेकं कृत्वा सप्तपुत्रान् सप्तवसून् मातागङ्गा गङ्गासलिले अर्पयामास। अष्टमपुत्रस्य समये शान्तनुः अतीव विचलितः भूत्वा मातरम् गङ्गां रुद्ध्वा तां पप्रच्छ-भवती का? कथं सर्वान् पुत्रान् सलिले अर्पणं करोसि? सर्वप्रश्नस्य यथाघटनाक्रमेण उत्तरं सा दत्तवती। परन्तु शर्तलङ्घनस्य कृते माता गङ्गा अष्टमबसूं नीत्वा मर्त्यं त्यक्त्वा स्वर्गमगच्छत्। अष्टमपुत्रस्य नाम देवव्रतः इति अभवत्। षट् त्रिंशत् वर्षानन्तरं अष्टमपुत्रं शान्तनुं निकषा निधाय स्वर्गं प्रति प्रत्यावर्त्तनं कृतवती। महाराजशान्तनुः देवव्रतं युवराजपदे अभिषिक्तं कृतवान्। तदनन्तरं एकदा शान्तनुः यमुनातीरे भ्रमणसमये दासराजकन्या सत्यवतीं दृष्ट्वा तस्या अपरूपरूपलावन्ये आकृष्ट सन् तां विवाहं चिकीर्षति। दासराजस्य एकमेव शर्तं यदि सत्यवत्याः पुत्रः हस्तिनापुरस्य उत्तराधिकारी भविष्यति तर्हि सत्यवत्या सह शान्तनोः विवाहं भविष्यति इति। देवव्रतः सर्वं ज्ञात्वा दासराजं समीपं गत्वा अवदत् सः स्वयं कदापि नृपः न भविष्यति, कदापि सः विवाहं न करिष्यति इति भीषनप्रतिज्ञां अकरोत्। अतो सः देवव्रतः सः हि भीष्मः।

**भीष्मस्य वंशपरिचयः**

ब्रह्मा - मरीचि - काश्यपः सूर्य्यदेवः -वैवस्वतः -पुरुरवा - आयुः-नहुशः-ययतिः - पुरुः - दुष्यन्तः - भरतः – हस्तीः – कुरुः - प्रतीपः - शान्तनुः - भीष्मः शान्तनोः पिता नृपः प्रतीपः भरतवंशस्य श्रेष्ठनृपाणां मध्ये एकः। नृपप्रतीपस्य परं शान्तनुः राजा अभवत्। सः प्रतीपस्य कनिष्ठपुत्रः आसीत्। प्रतीपस्य ज्येष्ठपुत्रः देवापिः मुनिवृत्तिं अगृह्नत्, प्रतिपस्य द्वितीयपुत्रः वालीकः मातुलवंशस्य राजा अभवत्। अतः कनिष्ठशान्तनुः हस्तिनापुरस्य राजा अभवत्। एकदा शान्तनुः मृगया कर्तुं जगाम। तदनन्तरं एकदा स्वेच्छाविहारिराजा शान्तनुः अगच्ठछत् गङ्गापुलिने, तथा अपरूपरूपलावन्यमयीपरमासुन्दरी नारीं ददर्श। तस्या सौन्दर्येन गङ्गापुलिनमालकितमासीत्। सा नारी गङ्गया सह शान्तनुः विवाहमभवत् तत् पश्चात् घचनाक्रम् वयं जानामः माता गङ्गा देवव्रतं नीत्वा स्वर्गंमगच्छत्, तनन्तरं वहुदिवसाः अतिक्रान्तमभवत्, अतः शान्तनुः एकदा गङ्गपुलिने विहारकाले वालकमेकमपश्यत्। वालकः महावलवानः महातेजस्वी। शान्तनुः अपश्यत् वालकःएकस्य पश्चात् एकस्य वाणं निक्षेपं कृत्वा गङ्गायाः गति निरूद्धं कृतवान्। वालकस्य अलौकिककर्म दृष्ट्वा शान्तनुः यत्परनास्ति विस्मयेन हतवाकमभवत्। वालकं

दृष्ट्वा शान्तनोः स्मृतिपथि तस्य परिचयं न उदितमभवत्, बालकः तु शान्तनोः परिचयं तस्य माता सकासात् पूर्वं हि ज्ञात्वा तत्परं तां पश्य अति प्रसन्नमभवत्। तदनन्तरं बालकमन्तर्हितमभवत्। बालकमवलोक्य शान्तनोः मनसि अष्टमशिशुपुत्रस्य पूर्वस्मृति जागरितमभवत्। यतः बालकः हि मातागङ्गयाः च शान्तनोः अष्टमशिशुपुत्रमासीत्। गङ्गातीरे स्थित्वा शान्तनुः गङ्गां आह्वयति-गङ्गे गङ्गे, तत् श्रुत्वा गङ्गा, पुत्रस्य हस्तं धृत्वा शान्तनोः समीपे उपस्थितमभवत्।

आबाल्यात् देवव्रतः तस्य माता समीपे सिस्थ्वा युवावयसि उपनीतं अभवत्। तदा माता तां तस्य पिता समीपे निधाय गतवती। यतः आबाल्यात् मातुः समीपे अतिष्ठत् भीष्मः, अतः जनानां सकासं सः गङ्गापुत्रभीष्णरूपे अधिकपरिचितं अभवत्। माता तां देवव्रतः इति नाम दत्तवती इति मन्यते। माता गङ्गा देवव्रतं शान्तनुं निकषा निधाय़ देवव्रतस्य़ शिक्षाविषये शिक्षागुरुं परिचयं शान्तनुं प्रति दत्तवती। तस्य़ अस्त्रगुरु परशुरामः,तां वेदवेदाङ्ग पाठयति वशिष्टमुनिः तां राजनीतिविद्याज्ञानं दत्तवान् देवगुरुः वृहस्पतिः च दैत्यगुरुःशुक्राचार्यः। मातागङ्गावचनं श्रुत्वा शान्तनुः अष्टमपुत्रं द्वीधाहीनः अगृह्णत्। गङ्गातीरभूमेः देवव्रतं राजधानीं नीतवान् शान्तनुः च सभासदवर्गाः तं पुत्रं प्रसन्नमनसि अगृह्णन्। शान्तनुः राजधानीं प्रविश्य देवव्रतस्य युवराजपदे अभिषेकं चकार। देवव्रत अपि सर्वे प्रजानां आस्थाभाजनंमभवत्।

**भीष्मस्य उपदेशः**

पितामह भीष्मस्य़ आत्मत्यागः अतुलनीय़पराक्रमः च कर्त्तव्यबोधः तस्य कर्मनिष्ठाय़ाः परिचाय़कः। तस्य आसीत् अति शास्त्रीयज्ञाणः युधिष्ठिरं प्रति तस्य उपदेशः महाभारतस्य शान्तिपर्वणि अस्ति। महाभारते भीष्मः युधिष्ठिरं प्रति उपदेशं ददौ। उपदेशाः धर्मः नीतिः कर्त्तव्यविषये। भीष्मः युधिष्ठिरं अवदत् सत्यं वदेत्, न्यायपरायनं भवेत् सदा स्वस्य कर्त्तव्यं कुर्यात्।

**भीष्मस्य उपदेशवली-**

१. धर्मः हि मूलम्।सर्वोपरि धर्मस्थापनं कर्त्तव्यम्।

२. न्यायपरायनभूत्वा न्यायपथि अनुसरणं सदा कर्त्तव्यम्

३. स्वप्रतिज्ञा सदा रक्षेत्, भीष्मः अवदत् प्रतिज्ञापालनेन सम्मानं वृद्धिं आप्नति।

४. सः युधिष्ठिरं अवदत् स्वधर्म स्वकर्त्तव्य सर्वदा पालयेत्।

५. भीष्मः युधिष्ठिरं उवाच सदा सचेतनः तिष्ठेत्

६. भीष्मस्म अयं उपदेशाः स्वस्य जीवनस्य ज्ञानात् उद्भूत् आसीत्। सः अनेन

उपदेशेन युधिष्ठिरं

एकः कुशलसतनिर्भिकराजारूपे आख्येतुमिच्छतीति।

भीष्मेण युधिष्टिरं प्रति युद्धधर्मकथनम्

युधिष्ठिर उवाच।

अथ यो विजिगीषेत क्षत्रियः क्षत्रियं युधि।

कस्तस्य विजये धर्मो ह्योतं पृष्टो ब्रवीहि मे।। (१२ महाभारतम् शान्तिपर्वन्)

भीष्म उवाच

ससहायोऽसहायो वा राष्ट्रमागम्य भूमिपः।

ब्रयादहं यो राजेति रक्षिष्यामि च वः सदा।। (१२ महाभारतम् शान्तिपर्वन्)

महाज्ञाणी महापराक्रमी भीष्मः, भीष्मः अतीव ज्ञानी आसीत्, अर्णवसदृसं तस्य अपारज्ञानम्। वशिष्टमुनेःसकाशात् वेदादिज्ञानं अलभत्। राजनीतिज्ञानं देवगुरुवृहस्पतेःसकाशात् लेभे। युद्धविद्यायाःज्ञानं लभते स्म परशुरामस्य सकाशात्। तस्य वीरत्व समरे अद्वीतियरूपेण तेजस्वीरूपेण प्रतिभातमभवत्।

महेन्द्रसदृशः शौर्ये स्थैर्ये च हिमवानिव।

समुद्र इव गाम्भीर्यो सहिष्णुत्वे धरासमः।। (महाभारतम् ६/१३/८)

यः सर्वान्पृथिवीपालाम्समवेतान्महामृधे।

जिगायैकरथेनैव काशीपुयां महारथः।। (महाभारतम् ६/१३/६)

एकाकी सः अष्टमदिवसव्याप्य कुरुक्षेत्रे समरे पाण्डवाणां विपक्षे स्थित्वा युद्धं चकार श्रीकृष्णः उपस्थितः आसीत् तत् सत्त्वेपि। भीष्मः महाभारतस्य एकः असामान्य योद्धा यां परास्तं कर्तुं कः अपि न शक्नोति स्म। सर्वोपरि स सदा सत्यनिष्ठःन्यायनिष्ठःआसीत्। रणनीतिकुटनीतिविद्यायां विज्ञः भीष्मः सामदानदण्डभेदेन युद्धनीतिं परिचालनं कृतवान्। हस्तिनापुरस्य नृपः न भूत्वापि हस्तिनापुरं स्वपराक्रमप्रदर्शनपुर्वकं वुभोज इति। अतएव आर्दशः राजा आदर्शः भ्राता आदर्शमित्रं रूपे सः एकः दक्षः नायक सत्यवत्याः शान्तनोः च विवाहातनन्तरं पुत्रद्वयस्य जन्ममभवत् चित्राङ्गदः विचित्रवीर्यः। सत्यवतीं निकषा चित्राङ्गदं विचित्रवीर्यं च निधाय शान्तनुः स्वर्गं जगाम। भीष्मः पितासम भूत्वा नावालकपुत्रद्वयम् पालितवान्, च हस्तिनापुरस्य रक्षणावेक्षणं कृतवान्। चित्राङ्गदः स्वल्पकालं राजत्वं कृत्वा युद्धे ममार। अतः कनिष्टभ्राता विचित्रवीर्यः राजा वभूव। भीष्मः विचित्रवीर्यस्य विवाहार्थं काशीराजस्य तिस्रकन्यां अम्वांम्, अम्विकाम्, अम्वालिकां तासां स्वयंवरसभायाः वलपूर्वकं नीत्वा हस्तिनापुरे आनीतवान्। भीष्मं विवाहं चिकीर्षुःअम्वा भीष्मेण प्रत्याख्याता आसीत्। अतःसा भीष्मं अभिशापं ददौ। यत् परजन्मनि भीष्मस्य मृत्युकारनं अम्वा भविष्यति इति। इदमुक्त्वा अग्नौ आत्मानं आत्माहूतिं अम्वा प्रददे। परजन्मनि अम्वा हि शिखण्डिरूपेण कुरुक्षेत्रे समरे भीष्मस्य मृत्युकारनं वभूव। भीष्मः अतीव गुणी वीरःपराक्रमीः महान् योद्धा प्रजारञ्जकः भ्रातृप्रेमी आदर्शपुत्रः रूपे सदा प्रमानितः।

यस्य वीर्यं समाश्रित्व द्यूतं पुत्रस्तवाकरोत्।

स शेते निहतो राजन्सखे भीष्मः शिखण्डिना।। ( महाभारतम् ६/१३/५)

ककुदं सर्वयोधानां धाम सर्वधनुष्मताम्।

शरतल्पगतःस अद्य शेते कुरुपितामहः।। (महाभारतम् ६/१३/४)

सञ्जयोऽहं महाराज नमस्ते भरतर्षभ।

हतो भीष्मःशान्तनवो भरतानां पितामहः।। ( महाभारतम् ६ /१३/ ३)

विचित्रवीर्येण सह अम्विकां च अम्वालिकां कन्याद्वयस्य विवाहमभवत्। तदनन्तरं निःसन्तानविचित्रवीर्यःपरलोकगमनं चकार।

अतः हस्तिनापुरस्य सिंहासनस्य उत्तराधिकारी कः भविष्यति इति प्रश्नः? तदा सत्यवत्या आदेसेन, सत्यवत्या च पराशरस्य पुत्रः महाभारतस्य रचनाकारस्य महर्षिवेदव्यासस्य औरसे अम्विकायाः गर्भे धृतराष्ट्रस्य जन्ममभवत् च अम्वालिकायाःगर्भे पाण्डोः जन्ममभवत् च दासीगर्भे विदुरस्य जन्ममभवत्। धृतराष्टः जन्मान्धः अतो सः हस्तिनापुरस्य राजसिंहासनस्य उत्तराधिकारीरूपे आत्मप्रतिष्ठां कर्तुं न शक्नोति स्म। पाण्डु हि राजसिंहासनस्य सम्राट् वभूव। धृतराष्टेण सह गान्धारराजसुवलस्यकन्या गान्धार्या विवाहमभवत्। पाण्डुणा सह कुन्तिभोजस्य पालिताकन्या कुन्त्याः च मद्रराजकन्या माद्र्याःपरिनयमभवत्। धृतराष्टस्य शतपुत्राः च एकाकन्या आसीत्। पाण्डुःऋषेःअभिशापेन सन्तानोपत्तौ न सक्षमो वभूव। दुर्वासामुनेः आशीसेन समृद्धा कुन्ती देवं आह्वाहनं

कर्तुं शक्नोति स्म। अतो कुन्ती देवताआह्वानेन स्वस्य पुत्रत्रयस्य च माद्र्या पुत्रद्वयस्य माता अभवत्। एकदा कुन्ती दुर्वासामुनेःआशीषं परीक्षाय सूर्यदेवं आह्वाहनं कृतवती। तदा सूर्यदेवस्य औरसे कुन्तीपुत्रकर्णस्य जन्ममभवत्।

एकः विषादजनकः नायकः भीष्णः गुणीवीरः पराक्रमशालीयोद्धा प्रजानुरञ्जकः एकः श्रेष्ठचरित्रः। शान्तनोः प्रथमः पुत्रः अतः स हस्तिनापुरस्य राजसिंहासनस्य उत्तराधिकारी भूत्वापि कदापि राजा न अभवत् भ्रातृन् पुत्रसम मत्वा तेषां पालनार्थं सदा सचेष्टः सन् तान् सस्नेहं पालितवान्। भीष्म सदा गुणीः वीरः तथापि सदा वञ्चितः यतः

१. दासराजस्य शर्तरक्षार्थं भीष्मः हस्तिनपुरराजसिंहासनस्य उत्तराधिकारी भूत्वापि कदापि राजा न अभवत्, कदापि विवाहं न अकरोत्। स्वसुखं त्यक्त्वा सदैव कर्त्तव्यकर्मणि चकार हस्तिनापुरस्य हिताय।

२. विचित्रवीर्यस्य चित्राङ्गदस्य मरनस्य परं हस्तिनापुरस्य उत्तराधिकारार्थं, भीष्मः स्वयं पिता नासीत्, तथापि विचित्रवीर्यस्य चित्राङ्गदस्य पुत्रयोः पितृवत् पालितवान्। अहो - अदृष्टस्य विचित्रपरिहासः। यतो हि भीष्मः हस्तिनापुरस्य अद्वितीयः श्रेष्ठः राजा अशक्नोत्। तथापि राजा न तु अभवत्।

३. भीष्मः सदैव धृतराष्ट्रं पाण्डवाणां राज्याद्धं दातुमादिदेश, परन्तु धृतराष्टं तद्वाकं प्रति कर्णपातं न चकार। अतः द्यूतक्रीडायां हृतसर्वस्यपाण्डवाः हस्तिनापुरं परित्यज्य खाण्डवप्रस्थे अवसन्। तदा भीष्मः किंर्कत्तव्यविमूढवत् अतिष्टत्।

४. धृतराष्ट्रस्य राजसभायां द्यूतक्रीडायां कुलवधूद्रौपद्याः घोरापमानं दृष्ट्वापि असहायवत् अतिष्टत्। कुलवधूदौपद्या सम्मानं स रक्षां कर्त्तुं न शक्नोति स्म।

५. कुन्तिपुत्रकर्णः भीष्मं वभाष - भीष्मः कुरुगृहे खादति च मङ्गलं इप्सति पाण्डवाणां, पुत्रतुल्यकर्णस्य भीष्मं प्रति इदृशं अवभाषनं ध्रुवं हि वेदनादायकम्।

पाण्डवाणां वनवासाज्ञातवासस्य परं पुणः पितामह भीष्मः धृतराष्ट्रं एकाधिकवारं पाण्डवाणां प्राप्यराज्यं दातुं वभाष, धृतराष्ट्रः तत् नाकरोत्। आवाल्यात् स्नेहेन पालित पुत्रसमधृतराष्ट्रस्य ईदृशं व्यवहारं सत्यं हि अनैतिकम्।

अनन्तरं कुरुक्षेत्रस्य महासमरे स्वपरिजनं आहतं निहतं अवलोक्य भीष्मः स्वजीवनरक्षार्थं किं चिकीर्षति? मुमूर्षति न वा। ईदृशं वेदनादायकं परिवेशं भीष्मः आप्नोति स्म सर्वदा,भीष्मस्य आसीत् स्वेच्छामृत्युवरं, तथापि सः स्वेच्छामृत्युं न अगृह्नत्, नवनवउन्मेषभावना सर्वोपरि हस्तिनापुरं प्रति तस्य कर्त्तव्यं स्वेच्छामृत्युवरणं पथि विघ्नस्वरूपम् आसीत्। ईदृशं मृत्युवरणं भीष्मस्य स्वपक्षे अतीव कष्टकरं, सामान्यजनानां स्वपक्षे किं उद्यते। अतः प्रसङ्गेन अनेन वक्तुं शक्नुमः वयं भीष्मस्य इच्छामृत्यु किं आशीषं किं अभिशापं वा? ईदृशं वरं पिता शान्तनुः भीष्मं दत्तवान्, भीष्यस्य आत्मत्यागेन परमप्रीतः सन् पुत्रस्य भीषणप्रतिज्ञायां नन्दीतः सन् स्वेच्छामृत्युवरं अयच्छत्, इदं वर तस्य जीवनं ईदृशेन कण्टकेनावृतमकुरुत जीवनपथि यदा हि वरस्य प्रयोजनम् आसीत्, तदा हि सःइच्छामृत्युं न जग्राह स हस्तिनापुरस्य मङ्गलमकोरत्। अयं जीवनः पृथिव्याः वृद्धतममनुस्य करुनजीवनः।

**उपसंहारम् :**

सदा सर्वदा निस्वार्थः सन् हस्तिनापुरस्य कुशलकर्मणि मनोनिवेशनं चकार। परिणामस्वरूप स प्राप्तवान् शरशय्या। अतः महामतिभीष्मः महान् नेता महान्योद्धा महान् पुत्रः महान् युगनायकःरूपे अस्माकं मनसि चिरं जागरिष्यति। सम्राट् शान्तनुःस्वस्य सुयोग्यउत्तराधिकारी पुत्रः भीष्णः वर्तमानः तत् सत्वेपि सत्यवतीं विवाहं कर्तुं उशितवान्। भीष्णः अपि पुत्रधर्मं पालितवान्। पुत्रधर्मपालनाय कदापि विवाहं न कृत्वा सत्यवत्याः पुत्रद्वयम् नृपं कारयति स्म।सदा सतर्कप्रहरीवत् हस्तिनापुरं रक्षितवान्। विचित्रवीर्यस्य च चित्राङ्गदस्य मृत्योः परं तेषां पुत्राणां सस्नेहं पालितवान्। अतो भीष्मः सर्वतरूपेन स्वार्थकः एको महान् चरित्रः। यः कदापि राजसिंहासनस्य उत्तरधिकारी भूत्वापि सिंहासनस्य मर्यादा न अप्राप्नोत्। सः महान् तथापि सर्वतवञ्चित एको विषादजनकः नायकः भीष्म असीत् एकः महान् मानवः स्नेहधन्यपुत्रः, मित्रम् दार्शनिकः च नेता. स अधिकारी अतिवलशालीहस्तिनापुरराज्यस्य परन्तु इदं अति दुखदायकं यत् तस्य दुर्भागेन इदं सर्वं सः न आप्नोत।सः महाभारतस्य धार्मिकः

: महान् वलिष्टः एकः स्वाधीनपुरुषः चरित्रः। अतः इदं स्वच्छन्दसा वक्तुं शक्यते यत् भीष्मस्य कथा एकस्य श्रेष्टस्य वीरस्य विषादजनकनायकस्य कथा।

**References:**


1) Mahabharater chhoye prabin - Nrisingha prasad Bhaduri.

2) Mahabharata -Veda Vyasa.

3) Jaya- An Illustrated Retelling of the Mahabharata - Devdutt Pattanaik.

4) Here's a more detailed list:

5) C. Rajagopalachari: Known for his accessible and concise retelling of the epic.

6) Bibek Debroy: His 10-volume translation is a comprehensive, unabridged rendering of the Mahabharata.

7) Kamala Subramaniam: Her version is known for its detailed description of the epic.

8) Chitra Banerjee Divakaruni: "The Palace of Illusions" retells the story from Draupadi's point of view.

9) Anand Neelakantan: Author of "Ajaya: Roll of the Dice" and "Rise of Kali: Duryodhana's Mahabharata".

10) Shivaji Sawant: His "Mrityunjaya" focuses on Karna.

11) Irawati Karve: "Yuganta: The End of an Epoch" offers an anthropological perspective.

12) S.L. Bhyrappa: "Parva" is another novel based on the Mahabharata.



**Citation: Nanda. S. C.,** (2025) "Bhisma: The Story of Tragedy in Bravery", *Bharati International Journal of Multidisciplinary Research & Development (BIJMRD)*, Vol-3, Issue-07, July-2025.